# Shri Medha DakshinAmurti Ashtottarashata Namavali 108 Names

# श्री मेधादक्षिणामूर्त्यष्टोत्तरशतनामावलिः

## Document Information

Text title : Medha Dakshinamurti Ashtottarashata Namavali 108 Names

File name : medhAdakShiNAmUrtyaShTottarashatanAmAvaliH.itx

Category : aShTottarashatanAmAvalI, shiva

Location : doc_shiva

Transliterated by : Aruna Narayanan narayanan.aruna gmail.com

Proofread by : Aruna Narayanan narayanan.aruna gmail.com

Latest update : July 6, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# श्री मेधादक्षिणामूर्त्यष्टोत्तरशतनामावलिः

ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा ।
मूलमन्त्रवर्णाद्यात्मका अष्टोत्तरशतनामावलिः
ओङ्काराचलसिंहेन्द्राय नमः । ओङ्कारोद्यानकोकिलाय । ओङ्कारनीडशुकराजे ।
ओङ्कारारण्यकुञ्जराय । नगराज सुताजानतये । नगराजनिजालयाय ।
नवमाणिक्यमालाढ्याय । नवचन्द्रशिखामणये । नन्दिताशेषमौनीन्द्राय ।
नन्दीशादिमदेशिकाय । मोहानलसुधाधाराय । मोहाम्बुजसुधाकराय ।
मोहान्धकारतरणये । मोहोत्पलनभोमणये । भक्तज्ञानाब्धिशीतांशवे ।
भक्तज्ञानतृणानलाय । भक्ताम्भोजसहस्रांशवे ।
भक्तकेकिघनाघनाय । भक्तकैरवराकेन्दवे ।
भक्तकोकदिवाकराय नमः । २०

गजाननादिसम्पूज्याय नमः । गजचर्मोज्ज्वलाकृतये ।
गङ्गाधवलदिव्याङ्गाय । गङ्गाभङ्गलसज्जटाय । गगनाम्बरसंवीताय ।
गगनामुक्तमूर्धजाय । वदनाब्जजितश्रिये । वदनेन्दुस्फुरद्दिशाय ।
वरदानैकनिपुणाय । वरवीणोज्ज्वलत्कराय । वनवाससमुल्लासिने ।
वनलीलैकलोलुपाय । तेजः पुञ्जघनाकाराय । तेजसामविभासकाय ।
विधेयानां तेजःप्रदाय । तेजोमयनिजाश्रमाय । दमितानङ्गसङ्ग्रामाय ।
दरहासोज्ज्वलन्मुखाय । दयारस सुधासिन्धवे ।
दरिद्रधनशेवधये नमः । ४०

क्षीरेन्दुस्फटिकाकाराय नमः । क्षितीन्द्रमकुटोज्ज्वलाय ।
क्षीरोपहाररसिकाय । क्षिप्रैश्वर्यफलप्रदाय । नानाभरणमुक्ताङ्गाय ।
नारीसम्मोहनाकृतये । नादब्रह्मरसास्वादिने । नागभूषणभूषिताय ।
मूर्तिनिन्दितकन्दर्पाय । मूर्तामूर्तजगद्वपुषे । मूकाज्ञानतमोभानवे ।
मूर्तिमत्कल्पपादपाय । तरुणादित्यसङ्काशाय । तन्त्रीवादनतत्पराय ।
तरुमूलैकनिलयाय । तप्तजाम्बूनदप्रभाय । तत्त्वपुस्तोल्लसत्पाणये ।
तपनोडुपलोचनाय । यमसन्नुतसत्कीर्तये । यमसंयमसंयुताय नमः । ६०

यतिरूपधराय नमः । मौनमुनीन्द्रोपास्यविग्रहाय । मन्दारहाररुचिराय ।
मदनायुतसुन्दराय । मन्दस्मितलसद्वक्त्राय । मधुराधरपल्लवाय ।
मञ्जीरमञ्जुपादाब्जाय । मणिपट्टोलसत्कटये । हस्ताङ्कुरितचिन्मुद्राय ।
हंसयोगपटूत्तमाय । हंसजप्याक्षमालाढ्याय । हंसेन्द्राराध्यपादुकाय ।
मेरुशृङ्गसमुल्लासिने । मेघश्याममनोहराय । मेघाङ्कुरालवालाग्र्याय ।
मेधापक्कफलमाय । धार्मिकान्तकृतावासाय । धर्ममार्गप्रवर्तकाय ।
धामत्रयनिजारामाय । धरोत्तमहारथाय नमः । ८०

प्रबोधोदारदीपश्रिये नमः । प्रकाशितजगत्त्रयाय ।
प्रज्ञाचन्द्रशिलाचन्द्राय । प्रज्ञामणिलसत्कराय ।
ज्ञानिहृद्भासमानात्मने । ज्ञातृणामविदूरगाय ।
ज्ञानायादृतदिव्याङ्गाय । ज्ञातिजातिकुलातिगाय । प्रपन्नपारिजाताग्र्याय ।
प्रणतार्त्यब्धिबाडबाय । भूतानां प्रमाणभूताय । प्रपञ्चहितकारकाय ।
यमिसत्तमसंसेव्याय । यक्षगेयात्मवैभवाय । यज्ञाधिदेवतामूर्तये ।
यजमानवपुर्धराय । छत्राधिपदिगीशाय । छत्रचामरसेविताय ।
छन्दः शास्त्रादिनिपुणाय । छलजात्यादिदूरगाय नमः । १००

स्वाभाविकसुखैकात्मने नमः । स्वानुभूतिरसोदधये ।
स्वाराज्यसम्पदध्यक्षाय । स्वात्मारामहामतये । हाटकाभजटाजूटाय ।
हासोदस्तारिमण्डलाय । हालाहलोज्ज्वलगलाय ।
हारायितभुजङ्गमाय नमः । १०८

इति श्री मेधादक्षिणामूर्तिमनुवर्णाद्यादिमा अष्टोत्तरशतनामावलिः ॥

ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा ।

Encoded and proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Shri Medha DakshinAmurti Ashtottarashata Namavali 108 Names*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*